## संस्कृतबालादर्शे षोडशः पाठः ॥ १६ ॥

# लेखनम्

| | | |
|---|---|---|
| तथा । | इति । | एवम् । |
| सह । | विना । | मा । |

अयं कः ? सः बालकः । अस्य नाम किम् ? तस्य नाम कृष्णः इति । सः किं करोति ? सः लिखति । सः भ्रात्रे पत्रिकां लिखति ॥

त्वं किं लिखसि ? अहं लेखावलिपुस्तके संस्कृत प्रतिलेखनं लिखामि । प्रतिलेखनेन अक्षराणि सुन्दराणि भवन्ति ॥

तव नाम किम् ? मम नाम राघवः इति । राघव ! त्वं कस्मात् न लिखसि ? आर्य मम लेखिनी नास्ति । लेखन्या विना कथं लिखामि ? भद्र ! त्वं प्रतिदिनं लेखन्या पुस्तकेन च विना पाठालयम् आगच्छसि ? एवं मा कुरु । आर्य ! अहं कृष्णेन सह गृहं गत्वा लेखनीं आनयामि । तथा कुरु ॥

**क) प्रश्नाः - -**

१। अयं बालकः किं लिखति ?

सः बालकः भ्रात्रे पत्रिकां लिखति ।

२। केन अक्षराणि सुन्दराणि भवन्ति ?

लेखावलिपुस्तके प्रतिलेखनेन अक्षराणिसुन्दराणि भवन्ति ।

३। राघवः कुतः न लिखति ?

राघवस्य लेखनी नास्ति। लेखन्या विना न लिखति।

४। सः प्रतिदिनं पाठालयं कथम् आगच्छति ?

सः प्रतिदिनं लेखन्या च पुस्केन विना पाठालयम् आगच्छति।

५। त्वं केन सह कुत्र गत्वा लेखनीम् आनयसि ?

अहं कृष्णेन सह गृहं गत्वा लेखिनीम् आनयामि।

**Note: the correct writing of the letter म मकार - -**

**1.** ' म ' कार makāra at end of a sentence should be written as म्

**e.g लेखनम्।**

**2.** ' म ' कार followed by a vowel should be written म्

**e.g. कथम् आगच्छति।**

**3.** ' म ' कार followed by consonant shoul be written as (अनुस्वार)

e.g. **त्वं केन सह भाषसे।**

**ख) उचितैः पदैः वाख्यानि पूरयत - -**

| | |
|---|---|
| १। ____ विना कथं लिखसि ? | **लेखनी** विना कथं लिखसि ? |
| २। ____ विना कथं पठसि । | **पुस्तकेन** विना कथं पठसि। |
| ३। उपाध्यायः ____ सह संल्लपति। | उपाध्यायः **छात्रेन** सह संल्लपति। |
| ४। त्वं पित्रे ____ कदा लिखसि ? | त्वं पित्रे **पत्रिकां** कदा लिखसि ? |

**ग) ' पठ् ' धातोः ( परस्मैपदी ) ' लोट् ' रूपाणि –Imperative mood**

**( expresses a command, wish, blessing etc. )**

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| **प्र.पु.** | पठतु , पठतात् | पठतां | पठन्तु |
| **म.पु.** | पठ , पठतात् | पठतं | पठत |
| **उ.पु.** | पठानि --- | पठाव | पठाम |

**घ) संख्याशब्दाः रूपाणि**

| | पुंसि | स्त्रियां | नपुंसके |
|---|---|---|---|
| १ | एकः | एका | एकम् |
| २ | द्वौ | द्वे | द्वे |
| ३ | त्रयः | तिस्रः | त्रीणि |
| ४ | चत्वारः | चतस्रः | चत्वारि |

शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary

लेखनं ***n*** writing

तथा ***in*** so इति ***in*** thus

एवं ***in*** in this manner

सह ***in*** with

विना *in* without

मा ***in.*** don't , कुरु ***P.*** you do

नाम *n* name

पत्रिका *f* letter

प्रतिलेखनेन by copy - - writing

सुन्दरं ***a.n.*** beautiful

लेखनी ***f.*** pen

भद्र ! Oh ! my boy, lad